योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १०२

द्व्यधिकशततमः सर्गः १०२

कुम्भ उवाच ।

इति ते कथितं सर्वं शिखिध्वज महीपते ।

यथेदमुत्थितं सर्वं यथा च प्रविलीयते ।। १

एतच्छ्रुत्वा च बुद्ध्वा च मत्वा च मुनिनायक ।

यथेच्छसि तथा तिष्ठ दृष्टे स्पष्टे परे पदे ।। २

स्वर्गं गच्छाम्यहं पर्वकालेऽस्मिन्नारदो मुनिः ।

ब्रह्मलोकात्समायातो भवत्यमरसंसदि ।। ३

न मां पश्यति चेत्तत्र तत्कोपमुपगच्छति ।

नोद्वेजनीया भव्येन गुरवो हि कदाचन ।। ४

त्यक्तसंकल्पलेखेन न किंचिदभिवाञ्छता ।

त्वया सदैव वस्तव्यं दृष्टिरेषैव पावनी ।। ५

श्रीवसिष्ठ उवाच ।

इति यावत्प्रतिवचः पुष्पहस्तः शिखिध्वजः ।

प्रणामाय ददात्येष तावदन्तर्धिमाययौ ।। ६

प्रतिभानगतं वस्तु यथैवान्ते न दृश्यते ।

न दृष्टवांस्तथा कुम्भमग्रे राजा शिखिध्वजः ।। ७

गते कुम्भे महीपालः परं विस्मयमाययौ ।

तमेव चिन्तयंश्चित्रं चित्रार्पित इवाभवत् ।। ८

इदं संचिन्तयामास चित्रं विलसितं विधेः ।

यत्कुम्भव्यपदेशेन बोधितोऽस्मि चिरोदयम् ।। ९

क्व नारदसुतः कुम्भः क्वाहं नाम शिखिध्वजः ।

केवलं कालयुक्त्यैव सोऽहं संपरिबोधितः ।। १०

अहो नु सम्यक्कथितं देवपुत्रेण युक्तिमत् ।

अहो नु संप्रबुद्धोऽस्मि मोहनिद्राकुलश्चिरात् ।। ११

क्वाहमासं विनिर्मग्नः क्रियाजालकुकर्दमे ।

इदं कार्यमिदं नेति मिथ्या विभ्रमचक्रके ।। १२

अहो नु शीतला शुद्धा शान्तेयं पदवी निजा ।

रसायनोद्भवाकारा सत्त्वं शीतयतीह मे ।। १३

शाम्यामि परिनिर्वामि सुखमासे च केवलम् ।

तृणाग्रमपि नेच्छामि संस्थितोऽस्मि यथास्थितम् ।। १४

एवं संचिन्तयन्राजा नूनं निर्वासनाशयः ।

शैलादिव समुत्कीर्णो मौनमेवावतस्थिवान् ।। १५

तस्मिन्नेव ततो मौने निःसंकल्पे निराश्रये ।

प्रतिष्ठां निश्चलां प्राप्य स तस्थौ गिरिश्रृङ्गवत् ।। १६

स तत्र संशान्तभयोऽचिरेण

चिरेण विश्रान्तमतिः समात्मा ।

चिरेण संप्राप्तनिजामलात्मा

योगेन सुष्वाप ततोऽदितात्मा ।। १७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० चू० शिखिध्वजसमाधानं नाम द्व्यधिकशततमःसर्गः ।। १०२।।